# prachaNDachaNDItrishatI

# પ્રચણ્ડચણ્ડીત્રિશતી

## Document Information

Text title : prachaNDachaNDItrishatI

File name : prachaNDachaNDItrishatI.itx

Category : shatI, devii, otherforms, gaNapati-muni, devI, trishatI

Location : doc_devii

Author : Shri Vasishtha Ganapati Muni

Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com

Description-comments : The Collected Works of Vasishtha Kavyakantha Ganapati Muni Vol 2.15

Latest update : July 3, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 14, 2022

*sanskritdocuments.org*

# પ્રચણ્ડચણ્ડીત્રિશતી

પ્રથમં શતકમ્

પ્રથમો મુકુલસ્તબકઃ

વજ્રં જમ્ભભિદઃ સર્વસ્વં નભસઃ ।
વન્દે વૈરિસહં વિદ્યુજ્જ્યોતિરહમ્ ॥ ૧॥

સા શક્તિર્મરુતામીશાનસ્ય તતા ।
વ્યોમાગારરમા સા દેવી પરમા ॥ ૨॥

સૂક્ષ્મં વ્યાપિમહો દૃશ્યં વારિધરે ।
તત્ત્વં તે મરુતાં રાજ્ઞઃ પત્નિપરે ॥ ૩॥

દ્વાભ્યાં ત્વં વનિતારૂપાભ્યાં લસસિ ।
એકા તત્ર શચી ચણ્ડાચણ્ડ્યપરા ॥ ૪॥

એકા કાન્તિમતી ભર્તૃસ્તલ્પસખી ।
અન્યા વીર્યવતી પ્રાયો યુદ્ધસખી ॥ ૫॥

એકા મોહયતે શક્રં ચન્દ્રમુખી ।
અન્યા ભીષયતે શત્રૂનર્કમુખી ॥ ૬॥

એકસ્યાં તટિતો રમ્યા દીપ્તિકલા ।
અન્યસ્યાં સુતરામુગ્રા શક્તિકલા ॥ ૭॥

એકસ્યાઃ સદૃશી સૌન્દર્યે ન પરા ।
અન્યસ્યાસ્તુ સમા વીર્યે નાસ્ત્યપરા ॥ ૮॥

એકા સઞ્ચરતિ સ્વર્ગે ભોગવતી ।
અન્યા ભાતિ નભોરઙ્ગે યોગવતી ॥ ૯॥

એકા વા દશયોઃ ભેદેન દ્વિવિધા ।
ઇન્દ્રાણી વિબુધૈઃ ગીતા પુણ્યકથા ॥ ૧૦॥

ચણ્ડિ ત્વં વરદે પિણ્ડે કુણ્ડલિની ।
ગીતા ચ્છિન્નશિરાઃ પ્રાજ્ઞૈર્વૈભવિની ॥ ૧૧॥

આહુઃ કુણ્ડલિનીં યન્મૂર્ધ્ના વિયુતામ્ ।
ચિત્રા સા વચસો ભઙ્ગી બુદ્ધિમતામ્ ॥ ૧૨॥

પુત્રાચ્છિન્નશિરાઃ પુણ્યાયાઽબ્જમુખી ।
આવિક્ષત્ કિલ તાં શક્તિઃ શક્રસખી ॥ ૧૩॥

તસ્માદ્ધાયમવચ્ચિત્તામ્ભોજરમા ।
ઉક્તા કૃત્તશિરાઃ સા શક્તિઃ પરમા ॥ ૧૪॥

ઓજીયસ્યબલા તુલ્યા કાપિ નતે ।
રાજારેર્જનનિ સ્વર્નારીવિનુતે ॥ ૧૫॥

યાવન્તોઽવતરાઃ શક્તેર્ભૂમિતલા ।
વીર્યેણાસ્યધિકા તેષુ ત્વં વિમલે ॥ ૧૬॥

પ્રાગેવ ત્વયિ સત્યૈન્દ્રીશક્તિકલા ।
વ્યક્તાઽભૂચ્છિરસિ ચ્છિન્ને ભૂરિબલા ॥ ૧૭॥

ત્વં છિન્ને મહસાં રાશિઃ શક્તિરસિ ।
હુઙ્કારેણ રિપુવ્રાતં નિર્દહસિ ॥ ૧૮॥

ભોગાસક્તરતિગ્રાહાઙ્કાસનગા ।
બાલાર્કદ્યુતિભૃત્પાદામ્ભોજયુગા ॥ ૧૯॥

છિન્નં પાણિતલે મૂર્ધાનં દધતી ।
પ્રાણાનાત્મવશે સંસ્થાપ્યાનહતી ॥ ૨૦॥

સ્ફારાસ્યેન પિબન્ત્યુલ્લોલાનસૃજઃ ।
ધ્વસ્તાનાદધતી દૃપ્તાન્ ભૂમિભુજઃ ॥ ૨૧॥

ડાકિન્યાઽનઘયા વર્ણિન્યા ચ યુતા ।
રામામ્બાઽવતુ માં દિવ્યં ભાવમિતા ॥ ૨૨॥

કાર્યં સાધયિતું વીર્યં વર્ધય મે ।
ચિત્તં સ્વાત્મનિ ચ ચ્છિન્ને સ્થાપય મે ॥ ૨૩॥

યોગં મે વિષયારાત્યબ્ધિં તરિતુમ્ ।
ચિત્તં દેવિ કુરુ ત્વં સાક્ષાદ્વિતુમ્ ॥ ૨૪॥

માન્દારૈરિવ મે ગાયત્રૈર્વિમલૈઃ ।
છિન્ને સિધ્યતુ તે પાદાર્ચા મુકુલૈઃ ॥ ૨૫॥

---

દ્વિતીયો બૃહતીસ્તબકઃ

નિખિલામયતાપહરી નિજસેવકભવ્યકરી ।
ગગનામૃતદીપ્તિઝરી જયતીશ્વરચિલ્લહરી ॥ ૨૬॥

વિપિને વિપિને વિનુતા નગરે નગરે નમિતા ।
જયતિ સ્થિરચિત્તહિતા જગતાં નૃપતેર્દયિતા ॥ ૨૭॥

મતિકૈરવિણીન્દુકલા મુનિહૃત્કમલે કમલા ।
જયતિ સ્તુતિદૂરબલા જગદીશવધૂર્વિમલા ॥ ૨૮॥

કલિપક્ષજુષાં દમની કલુષપ્રતતેઃ શમની ।
જયતિ સ્તુવતામવની સદયા જગતો જનની ॥ ૨૯॥

અતિચણ્ડિસુપર્વનુતે બલપૌરુષયોરમિતે ।
જનનં સુજનાવનિતે જગતામુપકારકૃતે ॥ ૩૦॥

સકલામયનાશચણે સતતં સ્મરતઃ સુગુણે ।
મમ કાર્યગતેઃ પ્રથમં મરણં ન ભવત્વધમમ્ ॥ ૩૧॥

મરણસ્ય ભયં તરિતું કરુણારસવાહિનિ તે ।
સ્મરણાદ્રસયામિ ગલચ્ચરણામ્બુરુહાદમૃતમ્ ॥ ૩૨॥

વનિતાવપુષઘ્રણં જગદમ્બ ન વેદ્મિ તવ ।
વિયદગ્નિતનોઘ્રણં શિરસેહ વહામિ સદા ॥ ૩૩॥

શતશઃ પ્રસૃતૈર્ઘ્રણૈઃ મુનિમસ્તકવીથિષુ સા ।
વિપુલે ગગને વિતતા ચરતિ ત્રિદશેશસખી ॥ ૩૪॥

વિશતિ પ્રવિધાય પથશ્ચરણસ્ય વિભામ્બગુહામ્ ।
વિહિતસ્ય મમેહશિરસ્યજરે જગદીશ્વરિ તે ॥ ૩૫॥

ચરણસ્ય વિભા કિમુ તે તવ કાચન વીચિરુત ।
વિવિધા વિદધાતિ કથાઃ પ્રવિશન્ત્યયિ ભક્તગુહામ્ ॥ ૩૬॥

નિજવીચિવિલાસપદં મમ કાયમિદં જગતિ ।

કરણં સુરકાર્યકૃતે તવ નિસ્તુલભે ભવતુ ॥ ૩૭॥

મમ વર્ષ્મણિ હીનબલે યદિ કશ્ચન લોપ ઇવ ।
તમપોહ્યપટિષ્ઠતમં કુરુ વિષ્ટપમાતરિદમ્ ॥ ૩૮॥

સહતામિદમમ્બવપુસ્તવ નાટ્યમપારજવમ્ ।
બહિરન્તરશત્રુસહં ભજતાં બહુલં ચ બલમ્ ॥ ૩૯॥

પૃથિવી ચ સહેત ન તે તટિદીશ્વરિ નાટ્યજવમ્ ।
કરુણા યદિ દેવિ ન તે વપુષામિહ કા નુ કથા ॥ ૪૦॥

તવ શક્તિઝરીપતનં બહિરદ્ભુતવૃષ્ટિરિવ ।
ઇદમન્તરનન્તબલે મદિરારસપાનમિવ ॥ ૪૧॥

પરમિક્ષુરસો મધુરો મદિરામદકૃત્પરમા ।
મધુરા મદકૃચ્ચ ભૃશં તવ શક્તિકલાલહરી ॥ ૪૨॥

રસનેન્દ્રિયમાત્રામુદં વર ઇક્ષુરસઃ કુરુતે ।
બહિરન્તરપિ પ્રમદં તવ શક્તિકલાલહરી ॥ ૪૩॥

વપુષો મનસશ્ચધિયો બલમદ્ભુતમાદધતી ।
પ્રમદં ચ જયત્યજરે તવ શક્તિકલાલહરી ॥ ૪૪॥

તવ શક્તિકલાલહરી પરિશોધયતે ભુવિ યમ્ ।
વિદુરાગમસારવિદઃ સનિમેષમમર્ત્યમિમમ્ ॥ ૪૫॥

લહરીમખિલામ્બ વિના તવ યોઽનુભવં વદતિ ।
અયિ વઞ્ચિત એષ મૃષા વિષયેણ મહાવિભવે ॥ ૪૬॥

સતતાલહરી યદિ તે બહિરન્તરપિ પ્રગુણા ।
ભવબન્ધચયઃ શિથિલો ભુવિ જીવત એવ ભવેત્ ॥ ૪૭॥

ઇહ તાવદપારબલે સકલા અપિ યોગકથાઃ ।
તવ યાવદનન્તજુષો ન પવિત્રઝરીપતનમ્ ॥ ૪૮॥

વિષયારિવિનાશવિધૌ રમણીયમુપાયમજે ।
કથયેશ્વરિ મે વિશદં તવ નામ્બ ન સાધ્યમિદમ્ ॥ ૪૯॥

ગણનાથકવેઃ કૃતિભિઃ બૃહતીભિરિમાભિરજા ।
પરિતૃપ્યતુ ચણ્ડવધૂઃ કપટાગગનાગ્નિકલા ॥ ૫૦॥

તૃતીયઃ સુપ્રતિષ્ઠાસ્તબકઃ

ચણ્ડચણ્ડિકાં બાલભાનુભામ્ ।
નૌમિ દેવતારાજવલ્લભામ્ ॥ ૫૧॥

નાભિમણ્ડલશ્વેતપદ્મગે ।
ચણ્ડદીધિતેર્મણ્ડલે સ્થિતામ્ ॥ ૫૨॥

સૂક્ષ્મનાડિકાદેહધારિણીમ્ ।
ઘોરપાતકવ્રાતહારિણીમ્ ॥ ૫૩॥

ઉગ્રવિક્રમચ્છિન્નમસ્તકામ્ ।
દગ્ધવાસનાઘાસજાલકામ્ ॥ ૫૪॥

નૌમિ સદ્ધિયં સિદ્ધસંસ્તુતામ્ ।
વજ્રધારિણઃ શક્તિમદ્ભુતામ્ ॥ ૫૫॥

પ્રાણિનાં તનૌ તન્તુસન્નિભામ્ ।
અમ્બરસ્થલે વ્યાપકપ્રભામ્ ॥ ૫૬॥

ચારુવર્ણિનીપ્રીતિલાલિતામ્ ।
ભીમડાકિનીવીર્યનન્દિતામ્ ॥ ૫૭॥

દીપ્યદક્ષિભાભીષિતાસુરામ્ ।
નૌમિ વજ્રિણઃ શક્તિમક્ષરામ્ ॥ ૫૮॥

યા વિશત્તપોધ્વસ્તપાતકામ્ ।
રેણુકાં સુતચ્છિન્નમસ્તકામ્ ॥ ૫૯॥

નૌમિ તામરિવ્રાતમર્દિનીમ્ ।
નાકમેદિનીપાલભામિનીમ્ ॥ ૬૦॥

દેવસુન્દરીમસ્તલાલિતમ્ ।
અમ્બિકાપદં ભાતુ મે હિતમ્ ॥ ૬૧॥

શોધ્યતામયં સર્વધીપુષા ।
લોકધાત્રિ તે પાદરોચિષા ॥ ૬૨॥

કોટિશસ્તવ પ્રાજ્યશક્તયઃ ।
વિદ્યુદમ્બિકે પાદપઙ્ક્તયઃ ॥ ૬૩॥

તાસુ વિક્રમાધાયિચેષ્ટિતમ્ ।
તાસુ વિષ્ટપજ્ઞાનમદ્ભુતમ્ ॥ ૬૪॥

સર્વતોઽમ્બ તે પાદચેષ્ટિતમ્ ।
વેત્તિ તત્કૃતી નો જડઃ કૃતમ્ ॥ ૬૫॥

વેત્તિ યઃ કૃતી તત્રા તદ્બલમ્ ।
વેદ યો નના તત્ર નો ફલમ્ ॥ ૬૬॥

અર્પયેત્તનું યઃ સવિત્રિ તે ।
શક્તિવૈભવં તત્ર પણ્ડિતે ॥ ૬૭॥

પૂરુષો ભવન્નૂર્મિરચ્યુતે ।
મત્તનું સ્ત્રૈયં સમ્ભુનક્તુ તે ॥ ૬૮॥

સર્વતો ગતિર્ભામદમ્બ તે ।
મદ્ગુહાન્તરે ભાતુ વિશ્રુતે ॥ ૬૯॥

ઉગ્રવૈભવાશક્તિરન્તરે ।
ભાતુ તે પદપ્રેયસઃપરે ॥ ૭૦॥

ચણ્ડિ તે પુનશ્ચેત્પ્રચણ્ડતા ।
કીદૃગમ્બિકે સા મહોગ્રતા ॥ ૭૧॥

મર્ત્યહસ્તિનં મસ્તભેદિની ।
શક્તિરમ્બ તે પાતુ પાવની ॥ ૭૨॥

ઉત્તમોત્તમા ચિત્તચિન્ત્યતામ્ ।
કૃત્તમસ્તકા મત્તકાશિની ॥ ૭૩॥

આત્મવૈરિણાં નાશને વિધિમ્ ।
બ્રૂહિ મે જનન્યન્તરાવધિમ્ ॥ ૭૪॥

ચેતસોઽમ્બ તે જાયતાં હિતમ્ ।
સૌપ્રતિષ્ઠસદ્ગીતમદ્ભુતમ્ ॥ ૭૫॥

---

ચતુર્થો નરમનોરમાસ્તબકઃ

અમરપાલિની દિતિજનાશિની ।
ભુવનભૂપતેર્જયતિ ભામિની ॥ ૭૬॥

અતિશુભા નભસ્તલવિસારિ ભા ।
જગદધીશિતુર્જયતિ વલ્લભા ॥ ૭૭॥

સુરમહીપતેર્હૃદયમોહિની ।
કપટકામિની જયતિ માયિની ॥ ૭૮॥

જયતિ કુણ્ડલીપુરનિકેતના ।
તટિદધીશ્વરી તરલલોચના ॥ ૭૯॥

વિમલમસ્તકૈર્હૃદિ વિધારિતા ।
દલિતમસ્તકા જયતિ દેવતા ॥ ૮૦॥

જયતિ વિદ્યુતો યુવતિભૂમિકા ।
ઇહ ખલાન્તકૃજ્જયતિ રેણુકા ॥ ૮૧॥

અમિતવિક્રમે જયજયામ્બિકે ।
પરશુધારિણો જનનિ રેણુકે ॥ ૮૨॥

વિનતપાલિકે ધરણિકાલિકે ।
જનપતિદ્વિષો જનનિ પાહિ મામ્ ॥ ૮૩॥

મમ ક્તદમ્બુજં તવ પદામ્બુજે ।
ભજતુ લીનતાં કપટનાર્યજે ॥ ૮૪॥

૧૦૮
કરુણયા ક્રિયાદ્ભગવતી શુભા ।
મમ મુદાવહં મદમુદારભા ॥ ૮૫॥

તવ મદે વૃષા જયતિ દાનવાન્ ।
તવ મદે હરો નટતિ મોદવાન્ ॥ ૮૬॥

તવ મદે રવિસ્તપતિ તેજસા ।
તવ મદે સ્વભૂરવતિ ચૌજસા ॥ ૮૭॥

તવ મદે શશી રમયતેઽખિલમ્ ।
તવ મદેઽનિલઃ પ્રથયતે બલમ્ ॥ ૮૮॥

તવ મદેઽનલો જગતિ રાજતે ।
તવ મદે મુનિર્નિગમમીક્ષતે ॥ ૮૯॥

તવ મદે ધરા ભ્રમતિ મેદિની ।

તવ મદે તનુર્મમ ચ મોદિની ॥ ૯૦॥

દહનકીલવન્નિરુપમોગ્રતા ।
શશિમયૂખવત્પરમસૌમ્યતા ॥ ૯૧॥

ગગનદેશવત્સ્થિતિરચઞ્ચલા ।
તપનરશ્મિવદ્ગતિરપઙ્કિલા ॥ ૯૨॥

અમૃતવન્મદઃ પવનવદ્બલમ્ ।
તવ તરઙ્ગકે કિમિવ નો ફલમ્ ॥ ૯૩॥

તવ નવામહામદવિધાયિકા ।
અઘહરીસુરા જયતિ વીચિકા ॥ ૯૪॥

તવ સુચિન્તિકા જનનિ વીચિકા ।
અમૃતવર્ષિણી જયતિ હર્ષિણી ॥ ૯૫॥

અમરરાજ્ઞિદેવ્યસુરવિઘ્નહા ।
અસુરુપાસકાનવતિ તે કલા ॥ ૯૬॥

અનુગૃહીતવાક્તવ ગભસ્તિના ।
સકલસિદ્ધિરાડ્ ભવતિ દેવિના ॥ ૯૭॥

સતતચિન્તનાત્તવ ગુહાન્તરે ।
નિયતચેતસો જગદિદં કરે ॥ ૯૮॥

જનનિ મે વિધિં કથય ભીષણે ।
વિષયશાત્રાવવ્રજવિદારણે ॥ ૯૯॥

તવ મનોરમે સુરપતેરિમાઃ ।
વિદધતાં મુદં નરમનોરમાઃ ॥ ૧૦૦॥

---

## દ્વિતીયં શતકમ્

### પઞ્ચમો રથોદ્ધતાસ્તબકઃ

કૃત્તમસ્તમપિશાતકર્તરીં પાણિપદ્મયુગલેન બિભ્રતીમ્ ।
સંસ્મરામિ તરુણાર્કરોચિષં યોષિતં મનસિ ચણ્ડચણ્ડિકામ્ ॥ ૧૦૧॥

ચણ્ડચણ્ડિ તવ પાણિપઙ્કજે યન્નિજં લસતિ કૃત્તમસ્તકમ્ ।
દેવિ સૂચયતિ ચિત્તનાશનં તત્ત્વેન્દ્રહૃદયાધિનાયિકે ॥ ૧૦૨॥

દીપ્તિવિગ્રહલતાં મહાબલાં વહ્નિકીલનિભરક્તકુન્તલામ્ ।
સંસ્મરામિ રતિમન્મથાસનાં દેવતાં તરુણભાસ્કરાનનામ્ ॥ ૧૦૩॥

રશ્મિભિસ્તવ તનૂલતાકૃતા રશ્મિભિસ્તવ કૃતાશ્ચ કુન્તલાઃ ।
રશ્મિભિસ્તવ કૃતં જ્વલન્મુખં રશ્મિભિસ્તવ કૃતે ચ લોચને ॥ ૧૦૪॥

દેવિ રશ્મિકૃતસર્વવિગ્રહે દૃષ્ટિપાતકૃતસાધ્વનુગ્રહે ।
અમ્બરોદવસિતે શરીરિણામમ્બ પાહિ રવિબિમ્બચાલિકે ॥ ૧૦૫॥

યત્તવાસનમશેષમોહનૌ વિદ્યુદક્ષિરતિસૂનસાયકૌ ।
એતદિન્દ્રસખિ ભાષતે ત્વયા તાવુભાવપિ બલાદધઃ કૃતૌ ॥ ૧૦૬॥

દૃષ્ટિરેવ તવ શસ્ત્રમાહવે શાત્રવસ્તુ તવ ન ક્ષમઃ પુરઃ ।
વસ્ત્રમમ્બ દિશ એવ નિર્મલાઃ પ્રેક્ષિતું ભવતિ ન પ્રભુઃ પરઃ ॥ ૧૦૭॥

ચક્ષુષાં દશશતાનિ તે રુચિં પાતુમેવ પરમસ્ય વજ્રિણઃ ।
ભાસ્વતઃ કરસહસ્રમમ્બિકે લાલનાય તવ પાદપદ્મયોઃ ॥ ૧૦૮॥

શૂલમગ્નિતિલકસ્ય ધૂર્જટેઃ ચક્રમચ્છજલજાતચક્ષુષઃ ।
વજ્રમમ્બ મરુતાં ચ ભૂપતેઃ તેજસસ્તવ કૃતાનિ ભાગકૈઃ ॥ ૧૦૯॥

ભૈરવીચરણભક્તબાન્ધવી તારિણી ચ સુરપક્ષધારિણી ।
કાલિકા ચ નતપાલિકાઽપરાશ્ચણ્ડચણ્ડિ તવ ભીમભૂમિકાઃ ॥ ૧૧૦॥

રક્ષ મે કુલમતીન્દ્રિયે તતે રાક્ષસાદિનિ સુરૈઃ સમર્ચિતે ।
પુત્રશિષ્યસહિતોઽહમમ્બ તે પાવનં પદસરોરુહં શ્રયે ॥ ૧૧૧॥

ઐન્દ્રિદેવિ ભવતી મહાબલા છિન્નમસ્તયુવતિસ્તુ તે કલા ।
સર્વલોકબલવિત્તશેવધેઃ પેરક્ષિતાઽસ્તિ તવ કો બલાવધેઃ ॥ ૧૧૨॥

યેયમમ્બ રુચિરુજ્જ્વલાનને યા ચ કાચન વિભા વિભાવસૌ ।
તદ્દ્વયં તવ સવિત્રિ તેજસો ભૂમિનાકનિલયસ્ય વૈભવમ્ ॥ ૧૧૩॥

પ્રાણદા તવ રુચિર્જગત્ત્રાયે પ્રાણહૃચ્ચ બત કાર્યભેદતઃ ।
વૈભવં ભુવનચક્રપાલિકે કો નુ વર્ણયિતુમીશ્વરસ્તવ ॥ ૧૧૪॥

ઉદ્ભવસ્તવવિપાકવૈભવે નાશનં ચ જગદમ્બ દેહિનામ્ ।
યૌવનં નયનહારિનિર્મલં વાર્ધકં ચ વિતતાતુલપ્રભે ॥ ૧૧૫॥

નિર્બલો ભવતિ ભૂતલે યુવા યચ્ચ દેવિ જરઠો ભવેદ્બલી ।
તદ્વયં તવ વિચિત્રપાકતઃ પાકશાસનસખિ ક્ષરેતરે ॥ ૧૧૬॥

વાર્ધકેન બલકાન્તિહારિણા દારુણેન કટુકાર્યકારિણા ।
ગ્રસ્તમેતમધુના પુનઃ કુરુ ત્રાણદે યુવકવત્પદાશ્રિતમ્ ॥ ૧૧૭॥

ભોગલાલસતયા ન નૂતનં દેવિ વિક્રમમપારમર્થયે ।
અત્ર મે વપુષિ લાસ્યમમ્બ તે સોઢુમેવ મમ સેયમર્થના ॥ ૧૧૮॥

શક્તિરમ્બ મમ કાચિદન્તરે યા ત્વયૈવ નિહિતાલમલ્પકા ।
વૃદ્ધિમેત્ય સહતામિયં પરાં બાહ્યશક્તિમિહ નિર્ગલજ્ઝરામ્ ॥ ૧૧૯॥

અમ્બ તે નરસુરાસુરસ્તુતે દિવ્યશક્તિલહરીવિશોધિતમ્ ।
પાતકાનિ જહતીવ મામિમં કામયન્ત ઇવ સર્વસિદ્ધયઃ ॥ ૧૨૦॥

શક્તિરિન્દ્રસખિ ચેન્ન તે મૃષા ભક્તિરીશ્વરિ ન મે મૃષા યદિ ।
ઉલ્લસન્તુ રતિકન્તુપીઠિકે શીઘ્રમેવ મયિ યોગસિદ્ધયઃ ॥ ૧૨૧॥

અસ્તુ ભક્તિરખિલામ્બ મે ન વા શક્તિરેવ તવ સમ્પ્રશોધ્ય મામ્ ।
દેવકાર્યકરણક્ષમં બલાદાદધાતુ વિદધાતુ ચામૃતમ્ ॥ ૧૨૨॥

આસ્યમમ્બ તવ યદ્યપીક્ષિતં લાસ્યમેતદનુભૂયતે મયા ।
પાદઘાતતતિચૂર્ણિતાન્ચજે યત્ર યાન્તિ દુરિતાનિ સઙ્ક્ષયમ્ ॥ ૧૨૩॥

સ્વીયશક્તિલહરીવિલાસિને કિઙ્કરાય પદપદ્મલમ્બિને ।
ભાષતાં વિષયવૈરિદારણે ભઙ્ગવર્જિતમુપાયમમ્બિકા ॥ ૧૨૪॥

નિર્મલે કરુણયા પ્રપૂરિતે સન્તતં વિકસિતે મહામહે ।
અમ્બિકાહૃદિ વિતન્વતામિમાઃ સમ્પ્રસાદમતુલં રથોદ્ધતાઃ ॥ ૧૨૫॥

ષષ્ઠઃ સ્વાગતાસ્તબકઃ

યોગિને બલમલં વિદધાના સેવકાય કુશલાનિ દદાના ।
અસ્તુ મે સુરધરાપતિશક્તિશ્ચેતસશ્ચ વપુષશ્ચ સુખાય ॥ ૧૨૬॥

કાર્યમસ્તિ મમ કિઞ્ચન સત્યં તજ્જયાય વિલપામિ ચ સત્યમ્ ।
એવમપ્યકપટૈવ રતિર્મે વજ્રપાણિસખિ તે પદપદ્મે ॥ ૧૨૭॥

શ્રદ્ધયા તવ નુતિં વિદધામિ શ્રદ્ધયા તવ મનું પ્રજપામિ ।
શ્રદ્ધયા તવ વિજૃમ્ભિતમીક્ષે શ્રદ્ધયા તવ કૃપાં ચ નિરીક્ષે ॥ ૧૨૮॥

વિદ્યુદેવ ભવતી ચ મરુત્વાન્ વિદ્યુદેવ ગિરિશો ગિરિજા ચ ।

વિદ્યુદેવ ગણપઃ સહ સિદ્ધ્યા ષટ્કભેદ ઇહ કાર્યવિશેષૈઃ ॥ ૧૨૯॥

પૂરુષશ્ચ વનિતેતિ વિભેદઃ શક્તશક્તિભિદયા વચનેષુ ।
તેજ એવ ખલુ વિદ્યુતિ શક્તં વીર્ય એવ જગદીશ્વરિ શક્તિઃ ॥ ૧૩૦॥

વિદ્યુદમ્બરભુવિ જ્વલતીશે શબ્દમમ્બ કુરુ તે ચ સુસૂક્ષ્મમ્ ।
ઇન્દ્રરુદ્રયુગલવ્યવહારે કર્મયુગ્મમિદમીશ્વરિ બીજમ્ ॥ ૧૩૧॥

વૈદ્યુતસ્ય ભવસિ જ્વલતોઽગ્નેરમ્બ શક્તિરસતાં દમનિ ત્વમ્ ।
તસ્ય નાદવત આગમગીતા કાલિકા ભવતિ શક્તિરભીતા ॥ ૧૩૨॥

તેજસો રુચિરભીમકલાભ્યાં યદ્વદીશ્વરિ શચી ભવતી ચ ।
એવમાશ્રિતજનાવનિ ગૌરી કાલિકા ચ નિનદસ્ય કલાભ્યામ્ ॥ ૧૩૩॥

વૈદ્યુતોઽગ્નિરખિલેશ્વરિ પિણ્ડે મૂલતામરસપીઠનિષણ્ણઃ ।
ઇન્દ્રિયં ભવતિ વાગિતિ દેવં યં વિદો ગણપતિં કથયન્તિ ॥ ૧૩૪॥

ગ્રન્થિભેદવિકચે સરસીજે જૃમ્ભમાણમિહ વૈદ્યુતવહ્નિઃ ।
યાં રુચિં પ્રકટયત્યતિવીર્યાં સૈવ સિદ્ધિરિતિ કાચન લક્ષ્મીઃ ॥ ૧૩૫॥

વિદ્યુદેવ ભવતી નનુ ભાન્તી વિદ્યુદેવ નગજા નિનદન્તી ।
વિદ્યુદેવ તપસો વિલસન્તી વિગ્રહેષુ પરમેશ્વરિ સિદ્ધિઃ ॥ ૧૩૬॥

નૈવ કેવલમુદારચરિત્રે વિદ્યુદદ્ભુતતમા ત્રિવિભૂતિઃ ।
વૈભવં બહુ સહસ્રવિભેદં કો નુ વર્ણયતુ પાવનિ તસ્યાઃ ॥ ૧૩૭॥

વૈદ્યુતં જ્વલનમીશ્વરિ હિત્વા નૈવ દૈવતમભીષ્ટતમં નઃ ।
તદ્વિભૂતિગુણગાનવિલોલા ભારતી જયતુ મે બહુલીલા ॥ ૧૩૮॥

તેજસશ્ચ સહસશ્ચ વિભેદાદ્યા તનુસ્તવ ભવત્યુભયાત્મા ।
તદ્દ્વયં ચ મયિ ચિત્રચરિત્રે જૃમ્ભતાં નરજગત્કુશલાય ॥ ૧૩૯॥

પ્રાયશો નિગમવાચિ પુમાખ્યા તન્ત્રવાચિ વરદે વનિતાખ્યા ।
પ્રાણિનાં જનનિ તે વિબુધાનાં તત્ર હેતુરજરે રુચિભેદઃ ॥ ૧૪૦॥

અત્ર સિદ્ધિરુદિતા મમ દેહે ભૂમિકા ભુવનધાત્રિ તવાન્યા ।
આહ્વયત્યધિકશક્તિકૃતે ત્વાં ત્વં ચ સમ્પ્રવિશ દેહગુહાં નઃ ॥ ૧૪૧॥

જૃમ્ભતામિયમિતઃ કુલકુણ્ડાદન્તરિક્ષતલતોઽવતર ત્વમ્ ।
ઉલ્લસન્ત્વવલસન્તુ ચ દેહે વીચયોઽત્ર ભગિનીદ્વિતયસ્ય ॥ ૧૪૨॥

કેવલં ન સહસા મહનીયે તેજસા ચ વરદેઽવતર ત્વમ્ ।
અત્ર સિદ્ધિમપિ કેવલવીર્યોલ્લાસિનીં જનનિ યોજય ભાસા ॥ ૧૪૩॥

છિન્નમુજ્જ્વલતટિત્પ્રભનેત્રં કણ્ઠરક્તજલસીંગ્રહપાત્રમ્ ।
મસ્તકં તવ સહેશ્વરિ ધન્યં મસ્તકં મમ કરોતુ વિશૂન્યમ્ ॥ ૧૪૪॥

મોચિતાશ્રિતગુહાન્તરબન્ધઃ પ્રાણવાંસ્તવ સવિત્રિ કબન્ધઃ ।
વાસનાકુસુમતલ્પકસુપ્તાં સમ્પ્રબોધયતુ મે મતિમાપ્તામ્ ॥ ૧૪૫॥

દેવપૂજ્યચરણા તવ ચેટી નિર્વિબન્ધકરુણાપરિપાટી ।
વજ્રપાણિસખિ શોકદરિદ્રં વર્ણિની ભણતુ મે બહુભદ્રમ્ ॥ ૧૪૬॥

ચણ્ડચણ્ડિ તવ યુદ્ધવયસ્યા યોગિવેદ્યનિજવીર્યરહસ્યા ।
ચેતસશ્ચ ભુજયોશ્ચ સમગ્રં ડાકિની દિશતુ મે બલમુગ્રમ્ ॥ ૧૪૭॥

મન્મથેન સહ રાગરસાર્દ્રા પૂરુષાયિતરતા રતિરીડ્યા ।
આસનં તવ વશીકુરુતાન્મે સર્વલોકમપિ વજ્રશરીરે ॥ ૧૪૮॥

દૃપ્યતાં વિષયવૈરિગણાનાં મર્દનાય રમણીયમુપાયમ્ ।
અમ્બ શીઘ્રમભિધાય નય ત્વં મામિમં ચરણપઙ્કજબન્ધુમ્ ॥ ૧૪૯॥

તેજસા ચ સહસા ચ વિભાન્તી પુષ્કરે ચ યમિનાં ચ તનૂષુ ।
સમ્મદં ભજતુ વાસવશક્તિઃ સ્વાગતાભિરમલાભિરિમાભિઃ ॥ ૧૫૦॥

---

## સપ્તમ ઇન્દ્રવજ્રાસ્તબકઃ

જ્ઞાનાય હાનાય ચ દુર્ગુણાનાં ભાનાય તત્ત્વસ્ય પરસ્ય સાક્ષાત્ ।
દેવીં પ્રપદ્યે સુરપાલશક્તિમેકામનંશામભિતો વિભાન્તીમ્ ॥ ૧૫૧॥

ઈશોઽશરીરો જગતાં પરસ્તાત્ દેવી ખકાયા પરિતો જગન્તિ ।
પૂર્વો વિશુદ્ધો ગુણગન્ધશૂન્યઃ સ્થાનં ગુણાનામપરાઽખિલાનામ્ ॥ ૧૫૨॥

આક્રમ્ય લોકં સકલં વિભાતિ નો કેવલં ભૂરિ વિભૂતિરમ્બા ।
શુદ્ધા પરસ્તાદપિ નાથચિત્તિ રૂપા વિપાપા પરિતશ્ચકાસ્તિ ॥ ૧૫૩॥

ત્રૈલોક્યભૂજાનિરણોરણિષ્ઠસ્તસ્યાત્મશક્તિર્મહતો મહિષ્ઠા ।
એતદ્રહસ્યં ભુવિ વેદ યો ના તત્ત્વપ્રસઙ્ગએષુ ન તસ્ય મોહઃ ॥ ૧૫૪॥

જ્ઞાનં પરં ધર્મવદીશતત્ત્વં ધર્માત્મકં જ્ઞાનમજાસ્વરૂપમ્ ।
શક્તીશયોર્ભક્તુમશક્યયોરપ્યેવં વિભાગો વચસા વ્યધાયિ ॥ ૧૫૫॥

દૃશ્યસ્ય સર્વસ્ય ચ ભોગકાલે ધર્મી ચ ધર્મશ્ચ વિભાતિ બોધઃ ।
અન્તઃ સમાધાવયમેકરૂપઃ શક્તીશભેદસ્તદસાવનિત્યઃ ॥ ૧૫૬॥

ધર્મઃ પરસ્તાત્પરમેશ્વરી યા ધર્મિત્વમેષા જગતિ પ્રયાતિ ।
યાવજ્જગજ્જીવિતમપ્રણાશમાકાશમાશ્રિત્ય મહચ્છરીરમ્ ॥ ૧૫૭॥

વ્યક્તિં ખકાયાં પ્રજગુઃ પુમાંસમેકે પરે ક્લીબમુદાહરન્તિ ।
અસ્માકમેષા પરમાત્મશક્તિર્માતા સમસ્તસ્ય ચ કાઽપિ નારી ॥ ૧૫૮॥

ચિદ્રૂપમત્યન્તસુસૂક્ષ્મમેતત્ જ્યોતિર્યદાકાશશરીરમગ્ર્યમ્ ।
પ્રાણઃ સ એવ પ્રણવઃ સ એવ વહ્નિઃ સ એવામ્બરદેશવાસી ॥ ૧૫૯॥

વાયુશ્ચ રુદ્રશ્ચ પુરન્દરશ્ચ તસ્યૈવ વિશ્વં દધતઃ પુમાખ્યાઃ ।
શક્તિશ્ચ કાલી ચ મહાપ્રચણ્ડચણ્ડી ચ યોષિત્પ્રવરાહ્વયાનિ ॥ ૧૬૦॥

અત્રાપિ ધર્મી પુરુષઃ પરેષાં ધર્મસ્તુ નારી વિદુષાં મતેન ।
એષોઽપિ વાચૈવ ભવેદ્વિભાગઃ શક્યો વિધાતું ન તુ વસ્તુભેદાત્ ॥ ૧૬૧॥

ત્વં દેવિ હન્ત્રી મહિષાસુરસ્ય શુમ્ભં સબન્ધું હતવત્યસિ ત્વમ્ ।
ત્વં યોગનિદ્રામધુસૂદનસ્ય ભદ્રાસિ શક્તિર્બલવૈરિણસ્ત્વમ્ ॥ ૧૬૨॥

કાલસ્ય લીલાસહચારિણી ત્વં વામાઙ્ગમસ્યન્ધકવૈરિણસ્ત્વમ્ ।
સિદ્ધિસ્ત્વમશ્રાન્તતપોભિગમ્યા બુદ્ધિસ્ત્વમક્ષુદ્રમનુષ્યનમ્યા ॥ ૧૬૩॥

વિદ્યુત્ત્વમાકાશપથે ચરન્તી સૂર્યપ્રભા ત્વં પરિતો લસન્તી ।
જ્વાલા કૃશાનોરસિ ભીમલીલા વેલાતિગા ત્વં પરમસ્ય ચિત્તિઃ ॥ ૧૬૪॥

ભેદાઃ સહસ્રં તવ દેવિ સન્તુ ત્વં મૂલશક્તિર્મમ માતરેકા ।
સ્તોત્રાણિ તે બુદ્ધિમતાં વિભૂતિદ્વારા બહૂનીવ વિભાન્તિ લોકે ॥ ૧૬૫॥

ઉગ્રાણિ રૂપાણિ સહસ્રશસ્તે સૌમ્યાનિ ચાશેષસવિત્રિ સન્તિ ।
વ્યક્તિત્વમેકં તવ ભૂરિશક્તિવ્યક્તીઃ પૃથક્ ચ પ્રદદાતિ તેભ્યઃ ॥ ૧૬૬॥

કુર્વન્તિ તાઃ પાવનિ વિશ્વકાર્યં સર્વં ચ લોકામ્બ વિભૂતયસ્તે ।
સ્વવૈરિણાં ચ પ્રતિસન્ધિકાલં ગર્વં હરન્તિ ક્ષણદાચરાણામ્ ॥ ૧૬૭॥

ચણ્ડી પ્રચણ્ડા તવ યા વિભૂતિઃ વજ્રાત્મિકા શક્તિરપારસારા ।
સા સમ્પ્રદાયાતુલમમ્બ વીર્યં દેવી ક્રિયાન્માં કૃતદેવકાર્યમ્ ॥ ૧૬૮॥

આવિશ્ય યા માં વપુષો ગુહાયાં ચિત્રાણિ તે શક્તિરજે કરોતિ ।
સા કા તવ પ્રાજ્યવિભૂતિમધ્યે સદ્ધ્યેયરૂપે વિશદીકુરુષ્વ ॥ ૧૬૯॥

સંશોધનાયૈવ કૃતિઃ કિમસ્યાઃ સઞ્ચાલનાયાપિ કિમુ ક્રિયાણામ્ ।
શક્ત્યૈ કિમેષા વિદધાતિ ચેષ્ટામાહોસ્વિદચ્છાં ચ મતિં પ્રદાતુમ્ ॥ ૧૭૦॥

પ્રાણપ્રદા ભીમતમા ચ શક્તિર્યા કૃત્તશીર્ષા સહસાવિવેશ ।
સા મે ક્રિયાત્પ્રાણબલં પ્રશસ્તં હસ્તં ચ મે કાર્યપટું કરોતુ ॥ ૧૭૧॥

સન્દેહજાલં પ્રવિધૂય તેજઃ સન્દાયિની કૃત્તશિરાઃ કરોતુ ।
વૃન્દારકારાધિતપાદપદ્મા વન્દારુમન્દારલતા શુભં નઃ ॥ ૧૭૨॥

મામાવિશન્તી ભવ વા ન વા ત્વં સમ્પાદયેષ્ટં મમ વા ન વા ત્વમ્ ।
દુર્જ્ઞેયસારે જનનિ પ્રચણ્ડચણ્ડિ ત્વમેકા કુલદૈવતં નઃ ॥ ૧૭૩॥

નાશં વિધાતું વિષયદ્વિષાં મે પાશત્રયાન્મોચયિતું ચ દેહમ્ ।
શેષાહિવર્ણ્યે પદકિઙ્કરાય ભાષસ્વ યોગં જનનિ પ્રચણ્ડે ॥ ૧૭૪॥

સર્વાત્મશક્તેઃ પદબન્ધુગીતાઃ કુર્વન્તુ ભૂયાંસમિહ પ્રમોદમ્ ।
યુક્તસ્ય દેવ્યાસ્તટિતઃ સમાધિમત્તસ્ય ચિત્તસ્ય મમેન્દ્રવજ્રાઃ ॥ ૧૭૫॥

---

અષ્ટમો ભયહારિસ્તબકઃ

ઉગ્રતરનાદાં પાપહરપાદામ્ ।
નૌમિ ખલમારીં વજ્રધરનારીમ્ ॥ ૧૭૬॥

શક્તકરણાનાં ગુપ્તભરણાનામ્ ।
ધ્વાન્તહરવિદ્યુદ્વીચિકિરણાનામ્ ॥ ૧૭૭॥

નિત્યકરુણાનાં વ્યોમશરણાનામ્ ।
અસ્મિ ગુણવન્દી માતૃચરણાનામ્ ॥ ૧૭૮॥

કાચન શબર્યાં દેવિ મુનિનાર્યામ્ ।
પુણ્યવદધીતે મોહનકલા તે ॥ ૧૭૯॥

કાચિદપિ તસ્યાં મૌનિજનગીતે ।
કૃત્તશિરસીશે ભીષણકલા તે ॥ ૧૮૦॥

મઞ્જુતરગુઞ્જાહારનિકરાયૈ ।
ચાપશરયુક્તપ્રોજ્જ્વલકરાયૈ ॥ ૧૮૧॥

સર્વજનચક્ષુસ્તર્પણવિભાયૈ ।

જઙ્ગમવિચિત્રાસ્વર્ણલતિકાયૈ ॥ ૧૮૨॥

અભ્રચિકુરાયૈ શુભ્રહસિતાયૈ ।
માદકમનોજ્ઞસ્વાદુવચનાયૈ ॥ ૧૮૩॥

ઇન્દુવદનાયૈ કુન્દરદનાયૈ ।
મન્દરકુચાયૈ મન્દગમનાયૈ ॥ ૧૮૪॥

અઞ્જલિરયં મે કઞ્જનયનાયૈ ।
મૌનિકુલનાર્યૈ પાવનશબર્યૈ ॥ ૧૮૫॥

પાવનચરિત્રાં મારમણપુત્રામ્ ।
છિન્નશિરસં તાં નૌમિ મુનિકાન્તામ્ ॥ ૧૮૬॥

માતરયિ વીર્યત્રાતવરધર્મે ।
માઽસ્તુ હૃદિ મોહઃ સન્તિરિપુર્મે ॥ ૧૮૭॥

દેવિ મુનિચેતો રઙ્ગલસદૂર્મે ।
માઽસ્તુ હૃદિ કામઃ સુસ્થિતિરિપુર્મે ॥ ૧૮૮॥

દેવજનભર્તુઃ પ્રાણસખિ રામે ।
માઽસ્તુ હૃદિ ભીતિર્વીર્યદમની મે ॥ ૧૮૯॥

વ્યોમચરિ માતર્ભામયિ વિસીમે ।
માઽસ્તુ હૃદિ કોપો બુદ્ધિદમનો મે ॥ ૧૯૦॥

સાધ્વવનલોલે દેવિ બહુલીલે ।
અસ્તુ મમ ધૈર્યં ચેતસિ સુવીર્યમ્ ॥ ૧૯૧॥

સર્વતનુપાકાધાયિ તવ ભવ્યમ્ ।
અસ્તુ વરતેજો નેતૃ મમ દિવ્યમ્ ॥ ૧૯૨॥

ઇચ્છતિ સવિત્રી યત્ પ્રિયસુતાય ।
તદ્વિતર સર્વં દેવિ ભજકાય ॥ ૧૯૩॥

ઇચ્છતિ મનુષ્યો યદ્રિપુજનાય ।
મત્તદયિ દૂરે પાલય વિધાય ॥ ૧૯૪॥

વર્ધયતુ તેજો વર્ધયતુ શક્તિમ્ ।
વર્ધયતુ મેઽમ્બા વજ્રભૃતિભક્તિમ્ ॥ ૧૯૫॥

વજ્રમયિ માતર્વજ્રધરભક્તઃ ।
અસ્તુ તવ વીર્યાદત્ર ભુવિ શક્તઃ ॥ ૧૯૬ ॥

નશ્યતુ સમસ્તો વજ્રધરવૈરી ।
એતુ જયમન્તર્વજ્રધરનારી ॥ ૧૯૭ ॥

હસ્તધૃતમુણ્ડઃ કશ્ચન કબન્ધઃ ।
અસ્તુ મમ ભિન્નગ્રન્થિચયબન્ધઃ ॥ ૧૯૮ ॥

સાધય મદિષ્ટં યોગમભિધાય ।
દેવિ વિષયારિવ્રાતદમનાય ॥ ૧૯૯ ॥

સમ્મદયતાન્મે સ્વાંશકૃતશમ્બામ્ ।
ચારુભયહારિચ્છન્દ ઇદમમ્બામ્ ॥ ૨૦૦ ॥

---

તૃતીયં શતકમ્

નવમો મદલેખાસ્તબકઃ

વન્દે વાસવશક્તેઃ પાદાબ્જં પ્રિયભક્તમ્ ।
પ્રાતર્ભાસ્કરરક્તં પાપધ્વંસનશક્તમ્ ॥ ૨૦૧ ॥

હુઙ્કારાનલકીલાદગ્ધારાતિસમૂહામ્ ।
વિદ્યુદ્ભાસુરવીક્ષાનિર્ધૂતાશ્રિતમોહામ્ ॥ ૨૦૨ ॥

દેવસ્ત્રીનિટલેન્દુજ્યોત્સ્નાલાલિતપાદામ્ ।
મેઘશ્રેણ્યુપજીવ્યશ્રોત્રાકર્ષકનાદામ્ ॥ ૨૦૩ ॥

દીપ્તાં ભાસ્કરકોટિચ્છાયાયામિવ મગ્નામ્ ।
ગાત્રાલમ્બિવિનૈવક્ષૌમં કિઞ્ચિદિનગ્નામ્ ॥ ૨૦૪ ॥

કણ્ઠે કલ્પિતહારાં મુણ્ડાનાં શતકેન ।
જ્ઞેયામૂલ્યરહસ્યાં નિર્વ્યાજં ભજકેન ॥ ૨૦૫ ॥

સ્વર્ગસ્ય ક્ષિતિપાલં પશ્યન્તીં પ્રણયેન ।
ધુન્વાનાં વિબુધાનાં ભીતિં શક્તશયેન ॥ ૨૦૬ ॥

શક્તીનામધિરાજ્ઞીં માયાનામધિનાથામ્ ।
ચણ્ડાં કામપિચણ્ડીં ગાયામ્યદ્ભુતગાથામ્ ॥ ૨૦૭ ॥

ભિત્ત્વા મસ્તકમેતત્ પાદાઘાતબલેન ।

આવિશ્યાખિલકાયં ખેલત્પાવનલીલમ્ ॥ ૨૦૮॥

વેગેનાવતરત્તે તેજોનાશિતપાશમ્ ।
ચણ્ડે ચણ્ડિ સમસ્તં ગોપ્યં ભાસયતાન્મે ॥ ૨૦૯॥

અન્તઃ કિઞ્ચ બહિસ્તે માતર્દારિતમસ્તે ।
મામાવૃત્ય સમન્તાત્તેજઃ કર્મ કરોતુ ॥ ૨૧૦॥

ઇન્દ્રાણીકલયા યત્કૃત્તામાવિશદુગ્રા ।
શક્યં વર્ણયિતું તદ્દૃશ્યં કેન બુધેન ॥ ૨૧૧॥

પ્રાણાપેતશરીરાણ્યાવેષ્ટું પ્રભવન્તઃ ।
ભેતાલાસ્તવ ભૃત્યાશ્ચણ્ડે ચણ્ડિ ચરન્તઃ ॥ ૨૧૨॥

છિન્નાં સમ્પ્રવિશન્તીવજ્રેશ્વર્યતિશક્તા ।
નિઃશેષૈરતિભીમૈર્ભેતાલૈરભિષિક્તા ॥ ૨૧૩॥

ભેતાલાઃ પરમુગ્રાસ્ત્વં તેષ્વપ્યધિકોગ્રા ।
તસ્માદાહુરયિ ત્વાં ચણ્ડામીશ્વરિ ચણ્ડીમ્ ॥ ૨૧૪॥

આસીદ્વાતયિતું ત્વાં સાધોર્ધીર્જમદગ્નેઃ ।
ભેતાલપ્રભુસર્ગાયોલ્લઙ્ઘ્યૈવ નિસર્ગમ્ ॥ ૨૧૫॥

આદેષ્ટાશમવિત્તો હન્તાસાત્ત્વિકમૌલિઃ ।
વધ્યા નિશ્ચલસાધ્વી શોચ્યેતશ્ચ કથા કા ॥ ૨૧૬॥

નિર્યદ્રક્તકણેભ્યઃ કણ્ઠાત્તે ભુવિ જાતાઃ ।
માર્યાધામયવીજીભૂતસ્તમ્બવિશેષાઃ ॥ ૨૧૭॥

કરાગારનિવાસાત્માહિષ્મપત્યધિપસ્ય ।
જાતા ભાર્ગવશઙ્કા હત્યાયાસ્તવ મૂલમ્ ॥ ૨૧૮॥

સત્યં તેઽમ્બ ચરિત્રાં ભગ્નઃ કોઽપિ નિગુહ્ય ।
ત્રાતું યાદવકીર્તિં મિથ્યાહેતુમવાદીત્ ॥ ૨૧૯॥

અન્યાગારનિવાસે હત્યા ત્યાગ ઉતાહો ।
સ્ત્રીણાં ચેત્પરુષં ધિગ્ભાવં પૂરુષજાતેઃ ॥ ૨૨૦॥

સ્વાતન્ત્ર્યં વનિતાનાં ત્રાતું માતરધીશે ।
દૂરીકર્તુમપારં દૈન્યં પઞ્ચમજાતેઃ ॥ ૨૨૧॥

ધર્મં વ્યાજમધર્મં ભૂલોકે પરિહર્તુમ્ ।
વેદાર્થે ચ ગભીરે સન્દેહાનપિ હર્તુમ્ ॥ ૨૨૨॥

ઘોરં વર્ણવિભેદં કર્તું ચ સ્મૃતિશેષમ્ ।
ઉલ્લાસં મતિશક્ત્યોર્મહ્યં દેહિ મહાન્તમ્ ॥ ૨૨૩॥

યોગં મે વિષયારીન્ નિર્મૂલં પરિમાર્ષ્ટુમ્ ।
શ્રીમાતઃ કુરુ ચિત્તં કારુણ્યેન નિદેષ્ટુમ્ ॥ ૨૨૪॥

ચણ્ડ્યાઘણ્ડતમાયાઃ ચિત્તં સંયમમત્તમ્ ।
ભૂયઃ સમ્મદયન્તાં હૈરમ્બ્યો મદલેખાઃ ॥ ૨૨૫॥

દશમઃ પથ્યાવક્ત્રાસ્તબકઃ

ઇન્દ્રાણ્યાઃ પરમાં શક્તિં સર્વભૂતાધિનાયિકામ્ ।
પ્રચણ્ડચણ્ડિકાં દેવીં છિન્નમસ્તાં નમામ્યહમ્ ॥ ૨૨૬॥

ઇન્દ્રાણ્યાઃ શક્તિસારેણ પ્રાદુર્ભૂતે પરાત્પરે ।
પ્રચણ્ડચણ્ડિ વજ્રાત્મન્ વૈરોચનિ નમોઽસ્તુ તે ॥ ૨૨૭॥

ત્વં વિશ્વધાત્રિ વૃત્રારેઃ આયુધસ્યાધિદેવતા ।
સર્વપ્રચણ્ડભાવાનાં મધ્યે પ્રકૃતિતઃ પરા ॥ ૨૨૮॥

સર્વસ્મિન્નપિ વિશ્વસ્ય સર્ગેઽનર્ગલવિક્રમે ।
ત્વત્તશ્ચણ્ડતમો ભાવો ન ભૂતો ન ભવિષ્યતિ ॥ ૨૨૯॥

તટિતઃ શક્તિસારેણ વજ્રં નિર્મિતમાયુધમ્ ।
અભૂત્તદ્વિનયદ્દેવં તટિદેવ નિજાંશતઃ ॥ ૨૩૦॥

પર્વતશ્ચ પુલોમા ચ સજલોઽયં ઘનાઘનઃ ।
પાર્વતીતિ તટિદ્દેવીં પૌલોમીતિ ચ તદ્વિદુઃ ॥ ૨૩૧॥

શૈવાનાં ભાષયા દેવિ ત્વં તટિદ્દેવિ પાર્વતી ।
ઐન્દ્રાણાં ભાષયા માતઃ પૌલોમી ત્વમનામયે ॥ ૨૩૨॥

પૂર્વેષાં દયિતઃ શબ્દો દુર્ગેતિ દુરિતાપહે ।
પ્રચણ્ડચણ્ડિકાશબ્દ ઉત્તરેષામતિપ્રિયઃ ॥ ૨૩૩॥

વૈષ્ણવાનાં ગિરા દેવિ યોગમાયા ત્વમદ્ભુતા ।
વાચા હૈરણ્યગર્ભાણાં સવિત્રિ ત્વં સરસ્વતી ॥ ૨૩૪॥

દધાના ભુવનં સર્વં વ્યાપિકાપદ્વિવર્જિતા ।
તટિચ્છબ્દાયતે વ્યોમ્નિ પ્રાણિત્યપિ વિરાજતે ॥ ૨૩૫॥

પ્રચણ્ડચણ્ડિકા સેયં તટિત્સૂક્ષ્મેણ તેજસા ।
વિશ્વસ્મિન્નખિલાન્ભાવાન્માતાઽનુભવતિ સ્વયમ્ ॥ ૨૩૬॥

ભાવાનામનુભૂતાનાં વાક્યત્વેનાવભાસનમ્ ।
ભવત્યવ્યક્તશબ્દેઽસ્યાઃ સર્વવિજ્ઞાનશેવધૌ ॥ ૨૩૭॥

યદિ સા સર્વજગતાં પ્રાણશ્ચેતશ્ચ શેમુષી ।
પ્રાણચેતોમનીષાણાં તસ્યાઃ કો નામ સંશયઃ ॥ ૨૩૮॥

પ્રાણન્તી ચિન્તયન્તી સા રાજન્તી ચ વિહાયસિ ।
તટિચ્છબ્દાયમાના ચ દેવી વિજયતેતરામ્ ॥ ૨૩૯॥

સેચ્છયા દધતી રૂપં મોહનં કીર્ત્યતે શચી ।
પ્રચણ્ડચણ્ડિકા ગીતા બિભ્રાણા ભીષણં વપુઃ ॥ ૨૪૦॥

પિણ્ડે કુણ્ડલિનીશક્તિઃ સૈવ બ્રહ્માણ્ડચાલિકા ।
નિદ્રાતિ જડદેહેષુ યોગિદેહેષુ ખેલતિ ॥ ૨૪૧॥

એષા વૈરોચની દુર્ગા જ્વલન્તી તપસા પરા ।
સમુલ્લસતિ યસ્યાન્તઃ સ જીવન્નેવ મુચ્યતે ॥ ૨૪૨॥

યોગિનો બોધયન્તી માં યોગેન નિયતવ્રતાઃ ।
સર્વાર્પકસ્ય દેહે સા સ્વયમેવ સમુલ્લસેત્ ॥ ૨૪૩॥

શારીરશક્તિમાત્રસ્ય યોગી સઞ્ચાલકો ભવેત્ ।
બાહ્યશારીરશક્ત્યોસ્તુ યોગો નાનુગ્રહં વિના ॥ ૨૪૪॥

ચણ્ડનારીસ્વરૂપેણ તટિદ્રૂપેણ ચામ્બરે ।
પિણ્ડે કુણ્ડલિનીતન્વા ચરન્તી દેવિ રાજસે ॥ ૨૪૫॥

મસ્તકસ્થાનમનસો મહાદેવિ વિનાશનાત્ ।
રેણુકાયામુતાવેશાત્ કૃત્તમસ્તેતિ તે પદમ્ ॥ ૨૪૬॥

યદાવિશસ્ત્વમુગ્રેઽમ્બ રેણુકામુગ્રતેજસા ।
તદા પૃથઙ્મહાશક્તિઃ સા વ્યક્તિઃ સમપદ્યત ॥ ૨૪૭॥

વ્યક્તીનાં દુર્જનઘ્નીનાં ત્વત્તેજોભાગજન્મનામ્ ।
બહુત્વેપિ ત્વમેકૈવ મૂલશક્તિઃ સનાતની ॥ ૨૪૮॥

ઉપાયમભિધાયામ્બા વિષયારિવિદારણે ।
પ્રચણ્ડચણ્ડિકા દેવી વિનયત્વઙ્ઘ્રિસેવિનમ્ ॥ ૨૪૯॥

રમયન્તામુપશ્લોકયન્તિ યાન્તિ ક્ત્તદન્તરમ્ ।
પથ્યાવક્ત્રાણિ પાપઘ્નીમેતાનિ સ્છિન્નસ્તકામ્ ॥ ૨૫૦॥

---

એકાદશ ઉપજાતિસ્તબકઃ

મેરૂપમાનસ્તનભારતાન્તાં શક્રસ્ય લીલાસહચારિણીં તામ્ ।
હર્તું સમૂલં હૃદયસ્ય મોહં પ્રચણ્ડચણ્ડીમભિવાદયેઽહમ્ ॥ ૨૫૧॥

વેદાદિબીજં જલજાક્ષજાયા પ્રાણપ્રિયા શીતમયૂખમૌલેઃ ।
કન્તુર્વિધાતુર્હૃદયાધિનાથા જલં જકારો દહનેન યુક્ત્તઃ ॥ ૨૫૨॥

તોયં પુનર્દ્વાદશવર્ણયુક્તં ત્રાયોદશેનાથ યુતઃ કૃશાનુઃ ।
તાલવ્યવર્ગપ્રથમો નકારઃ તતશ્ચતુર્થસ્વરસમ્પ્રયુક્ત્તઃ ॥ ૨૫૩॥

એકાદશેનાથ યુતઃ સમીરઃ સ ષષ્ઠબિન્દુઃ સરણિઃ સુરાણામ્ ।
તદેવ બીજં પુનરસ્ત્રમન્તે કૃપીટયોનેર્મનસોઽધિનાથા ॥ ૨૫૪॥

વિદ્યા ત્વિયં સર્દિશાક્ષરાઢ્યા સ્વયં મહાકાલમુખોપદિષ્ટા ।
ગોપ્યાસુ ગોપ્યા સુકૃતૈરવાપ્યા ષષ્ઠીવિનુત્યા પરમેષ્ઠિનાપિ ॥ ૨૫૫॥

સ્થાને સહસ્રચ્છદસાયકસ્ય પુનર્યદીશાનમનોધિનાથા ।
સર્વાર્થદઃ સર્દિશાક્ષરોઽન્યઃ પ્રચણ્ડચણ્ડી મનુરુત્તમઃ સ્યાત્ ॥ ૨૫૬॥

વેદાદિબીજેન વિહીનમાદ્યં પુનર્ભવાનીવિયુતં દ્વિતીયમ્ ।
મન્ત્રાવુભૌ ષોડશવર્ણયુક્તૌ પ્રચણ્ડચણ્ડ્યાઃ પવિનાયિકાયાઃ ॥ ૨૫૭॥

મન્ત્રે તૃતીયે યદિ કૂર્ચબીજં સ્થાને રતેર્જીવિતવલ્લભસ્ય ।
મન્ત્રોઽપરઃ ષોડશવર્ણયુક્ત્તઃ પ્રચણ્ડચણ્ડ્યાઃ પટુશક્ત્તિરુક્ત્તઃ ॥ ૨૫૮॥

અયં હરેર્વલ્લભયા વિહીનો મન્ત્રોઽપરઃ પઞ્ચદશાક્ષરઃ સ્યાત્ ।
ક્રોધશ્ચ સમ્બોધનમસ્ત્રમગ્રેઃ સીમન્તિની ચેતિ ધરેન્દુવર્ણઃ ॥ ૨૫૯॥

ધેનુઃ કૃશાનોર્હૃદયેશ્વરી ચ પ્રચણ્ડચણ્ડી મનુરગ્નિવર્ણઃ ।
એકૈવ ધેનુઃ સુરરાજશક્ત્તેઃ એકાક્ષરઃ કશ્ચન મન્ત્રરાજઃ ॥ ૨૬૦॥

એતેષુ તન્ત્રાપ્રણુતેષુ ભક્ત્તો મન્ત્રાં નવસ્વન્યતમં ગૃહીત્વા ।

યઃ સંશ્રયેતાશ્રિતકામધેનું પ્રચણ્ડચણ્ડીં સ ભવેત્ કૃતાર્થઃ ॥ ૨૬૧॥

વેદાદિરમ્ભોરુહનેત્રજાયા માયાઙ્કુશબ્રહ્મનોધિનાથાઃ ।
ઇતીયમવ્યાજરતિં જપન્તં પઞ્ચાક્ષરી રક્ષતિ રેણુકાયાઃ ॥ ૨૬૨॥

ઋષ્યાદિસઙ્કીર્તનમેષુ માઽસ્તુ કરાઙ્ગવિન્યાસવિધિશ્ચ માઽસ્તુ ।
મૂર્તિં યથોક્તામુત દિવ્યતત્ત્વં ધ્યાત્વા જપેત્ સિદ્ધિરસંશયં સ્યાત્ ॥ ૨૬૩॥

નાભિસ્થશુક્લાબ્જગસૂર્યબિમ્બે સંસક્તરત્યમ્બુજબાણપીઠે ।
સ્થિતાં પદેનાન્યતરેણ સમ્યગુત્ક્ષિપ્તદીપ્તાન્યતરાઙ્ઘ્રિપદ્મામ્ ॥ ૨૬૪॥

દિગમ્બરામર્કસહસ્રભાસમાચ્છાદિતાં દીધિતિપઞ્જરેણ ।
કણ્ઠસ્થલીભાસુરમુણ્ડમાલાં લીલાસખીં દેવજનાધિપસ્ય ॥ ૨૬૫॥

છિન્નં શિરઃ કીર્ણકચં દધાનાં કરેણ કણ્ઠોદ્ગતરક્તધારામ્ ।
ધારાત્રયે તત્ર ચ મધ્યધારાં કરસ્થવક્ત્રેણ મુદા પિબન્તીમ્ ॥ ૨૬૬॥

પાર્શ્વે સખીં ભાસુરવર્ણિનીં ચ પાર્શ્વાન્તરે ભીષણડાકિનીં ચ ।
અન્યે પિબન્ત્યાવસૃગમ્બુધારે નિરીક્ષમાણામતિસમ્મદેન ॥ ૨૬૭॥

ભયઙ્કરાહીશ્વરબદ્ધમૌલિં જ્વલદ્યુગાન્તાનલકીલકેશીમ્ ।
સ્ફુરત્પ્રભાભાસુરવિદ્યુદક્ષીં ચણ્ડીં પ્રચણ્ડાં વિદધીત ચિત્તે ॥ ૨૬૮॥

ગુઞ્જાફલાકલ્પિતચારુહારા શીર્ષે શિખણ્ડં શિખિનો વહન્તી ।
ધનુશ્ચ બાણાન્દધતી કરાભ્યાં સા રેણુકા વલ્કલભૃત્વિચિન્ત્યા ॥ ૨૬૯॥

તટિજ્ઝરીં કામપિ સમ્પ્રશ્યન્ આકાશતઃ સર્વતનૌ પતન્તીમ્ ।
મૌનેન તિષ્ઠેદ્યમિનાં વરિષ્ઠો યદ્યેતદમ્બાસ્મરણં પ્રશસ્તમ્ ॥ ૨૭૦॥

દૃશ્યાનશેષાનપિ વર્જયિત્વા દૃષ્ટિં નિજાં સૂક્ષ્મમહઃસ્વરૂપામ્ ।
નિભાલયેદ્યન્મનસા વરીયાનન્યોઽયમમ્બાસ્મરણસ્ય માર્ગઃ ॥ ૨૭૧॥

વિના પ્રપત્તિં પ્રથમો ન સિધ્યેત્ માર્ગોઽનયોઃ કેવલભાવનાતઃ ।
હૃદિસ્થલે યોગબલેન ચિત્તેર્નિષ્ઠાં વિના સિધ્યતિ ન દ્વિતીયઃ ॥ ૨૭૨॥

આરમ્ભ એવાત્ર પથોર્વિભેદઃ ફલે ન ભેદો રમણો યથાહ ।
સ્થિતૌ ધિયો હસ્તગતાપ્રપત્તિઃ પ્રપત્તિસિદ્ધૌ સુલભૈવ નિષ્ઠા ॥ ૨૭૩॥

ઉપાયમેકં વિષયારિનાશવિધૌ વિધાયાવગતં મમામ્બા ।
કૃત્વા સમર્થં ચ નિજાનુકમ્પાં પ્રચણ્ડચણ્ડી પ્રથયત્વપારામ્ ॥ ૨૭૪॥

સધ્યાનમાર્ગં વરમન્ત્રકલ્પં પ્રચણ્ડચણ્ડ્યાઃ પરિકીર્તયન્ત્યઃ ।
ભવન્તુ મોદાતિશયાય શક્તેરુપાસકાનામુપજાતયો નઃ ॥ ૨૭૫॥

---

દ્વાદશો નારાચિકાસ્તબકઃ

વીર્યે જવે ચ પૌરુષે યોષાઽપિ વિશ્વતોઽધિકા ।
માં પાતુ વિશ્વચાલિકા માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૭૬॥

શુદ્ધા ચિતિઃ સતઃ પુરા પશ્ચાન્નભઃ શરીરકા ।
યોષાતનુસ્તતઃ પરં માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૭૭॥

પારે પરાત્મનઃ પ્રમા ખે શક્તિરુત્તમોત્તમા ।
પિણ્ડેષુ કુણ્ડલિન્યજા માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૭૮॥

નાકે વિલાસશેવધિર્નાલીકલોચના શચી ।
પ્રાણપ્રકૃષ્ટવિષ્ટપે માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૭૯॥

એકસ્ય સા મહેન્દિરા દેવી પરસ્ય કાલિકા ।
અસ્માકમુજ્જ્વલાનના માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૮૦॥

રાજીવબાન્ધવો દિવિ હ્રાદિન્યપારપુષ્કરે ।
અગ્નિર્મનુષ્યવિષ્ટપે માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૮૧॥

તેજઃ સમસ્તપાચકં ચક્ષુઃ સમસ્તલોકકમ્ ।
ચિત્તં સમસ્તચિન્તકં માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૮૨॥

દ્યૌસ્તેજસાં મહાનિધિઃ ભૂમિશ્ચ ભૂતધારિણી ।
આપશ્ચ સૂક્ષ્મવીચયો માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૮૩॥

નિર્બાહુકસ્ય સા કરો નિર્મસ્તકસ્ય સા મુખમ્ ।
અન્ધસ્ય સા વિલોચનં માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૮૪॥

પાણિં વિના કરોતિ સા જાનાતિ માનસં વિના ।
ચક્ષુર્વિના ચ વીક્ષતે માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૮૫॥

હસ્તસ્ય હસ્ત ઉત્તમઃ ચિત્તસ્ય ચિત્તમદ્ભુતમ્ ।
નેત્રાસ્ય નેત્રામાયતં માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૮૬॥

સા ભારતી મનીષિણાં સા માનસં મહાત્મનામ્ ।
સા લોચનં પ્રજાનતાં માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૮૭॥

સક્તિઃ સમસ્તબાધિકા યુક્તિઃ સમસ્તસાધિકા ।
શક્તિઃ સમસ્તચાલિકા માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૮૮॥

છિન્નાઽપિ જીવધારિણી ભીમાઽપિ શાન્તિદાયિની ।
યોષાઽપિ વીર્યવર્ધની માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૮૯॥

માહેન્દ્રશક્તિરુત્તમા સૂક્ષ્માઽપિ ભારવત્તમા ।
શાતાપિ તેજસા તતા માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૯૦॥

પુત્રેણ કૃત્તમસ્તકામાવિશ્ય રેણુકાતનુમ્ ।
સા ખેલતિ ક્ષમાતલે માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૯૧॥

મામુગ્રપાપહારિણી સર્વપ્રપઞ્ચધારિણી ।
પાયાદપાયતોઽખિલાન્ માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૯૨॥

ઇન્દ્રેસુરારિહર્તરિ ત્રૈલોક્યભૂમિભર્તરિ ।
ભક્તિં તનોતુ મે પરાં માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૯૩॥

નિષ્ઠામનન્યચાલિતાં શ્રેષ્ઠાં ધિયં ચ સર્વગામ્ ।
ગીતા સુરૈર્દદાતુ મે માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૯૪॥

સત્યાં ગિરં દદાતુ મે નિત્યાં કરોતુ ચ સ્થિતિમ્ ।
ધૂતાખિલાઽઘસન્તતિઃ માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૯૫॥

સર્વં ચ મે કૃતાકૃતં કર્માગ્ર્યમલ્પમેવ વા ।
સમ્પૂરયત્વનામયા માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૯૬॥

તેજોઽરસ્વરૂપયા ભૂયાદૃતસ્ય ધારયા ।
વિશ્વાવભાસિકેહ મે માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૯૭॥

સા મેઽલ્પમર્ત્યતાશ્રિતાં હત્વાઽધમામહઙ્કૃતિમ્ ।
આક્રમ્ય ભાતુ મે તનું માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૯૮॥

આત્મારિનાશને વિધિં સા મેઽભિધાયવત્સલા ।
સર્વં ધુનોતુ સંશયં માતા પ્રચણ્ડચણ્ડિકા ॥ ૨૯૯॥

એતાભિરુત્તમાંશુભિઃ નારાચિકાભિરીશ્વરી ।
સન્તોષમેતુ વર્ધતાં માતા પ્રચણ્ડચણ્ડિકા ॥ ૩૦૦॥

॥ ઇતિ શ્રીભગવન્મહર્ષિરમણાન્તેવાસિનો વાસિષ્ઠસ્ય
નરસિંહસૂનોર્ગણપતેઃ કૃતિઃ પ્રચણ્ડચણ્ડીત્રિશતી સમાપ્તા ॥

From Complete works of Shri Vasishtha Ganapati Muni Vol. 2.15

Proofread by Kaushal S. Kaloo kaushalskaloo at gmail.com

*prachaNDachaNDItrishatI*

pdf was typeset on January 14, 2022

Please send corrections to *sanskrit@cheerful.com*